# गीतासुधामाधुरी।

---

**Que.1. मातृभाषायां विवर्तयत।** **[Marks :(5)]**

**भारते बहवः गणितशास्त्रज्ञाः आसन् । तेषु प्रातःस्मरणीयः भवति भास्कराचार्यः। आन्ध्रप्रदेशराज्ये बिजडबिडाख्ये जनपदे सः जातः । तेन विरचितः प्रशस्तः ग्रन्थः भवति लीलावती । गणितशास्त्रं सरलतया अवगन्तुम् अयं ग्रन्थः प्रयोजकः भवति ।**

**Ans.** मातृभाषायां विवर्तयत।

यथायोग्यं विवर्तनं करोति चेत् पूर्णाङ्कः।

**Que.2. सूचनाः उपयुज्य श्लोकानां गद्यक्रमं लिखत।** **[Marks :(4)]**

**क. इन्द्रियाणां हि चरतां**

**यन्मनोनुविधीयते।**

**तदस्य हरति प्रज्ञां**

**वायुर्नावमिवाम्भसि।।**

**सूचना- इन्द्रियाणां हि---- यन्मनः --- तदस्य ------वायुः अम्भसि --- इव हरति।**

**ख. विहाय कामन्यः सर्वान्**

**पुमांश्चरति निस्पृहः।**

**निर्ममो निरहङ्कारः**

**स शान्तिमधिगच्छति।।**

**सूचना- यः पुमान् सर्वान् ------ विहाय निस्पृहः ----- निर्ममः ---- सः --- अधिगच्छति।**

**ग. नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना।**

**न चाभावयतः शान्तिरशान्तस्य कुतः सुखम्।।**

**सूचना- अयुक्तस्य ----नास्ति।---- भावना न।----शान्तिः च न। अशान्तस्य कुतः ----।**

**Ans.** सूचनाः उपयुज्य श्लोकानां गद्यक्रमं लिखत।

आशयव्यक्तता.

सूचनानाम् परिपूर्णता।

**Que.3. यथोचितं योजयत।** **[Marks :(4)]**

**क) विहाय - नौका।**

**नौः - प्रज्ञा।**

**बुद्धिः - शीघ्रम्।**

**आशु - ल्यबन्तमव्ययम्।**

**ख) अम्भः - नाशः।**

**हानिः - जलम्।**

**अशान्तः - निरासक्तः**

**निस्पृहः - शान्तिहीनः।**

**ग) योगक्षेमं वहाम्यहम् - बि एस् एन् एल् ।**

**कर्मणि व्यजते प्रज्ञा - भारतीयवायुसेना।**

**नभस्पृशं दीप्तम् - भारतीय जीवन बीमा निगमः।**

**अहर्निशं सेवामहै - केरल सर्वकलाशाला ।**

**Ans.** यथोचितं योजयत।

क) विहाय - ल्यबन्तमव्ययम्।

नौः - नौका।

बुद्धिः - प्रज्ञा।

आशु - शीघ्रम्।

ख) अम्भः - जलम्।

हानिः - नाशः।

पुमान् - पुरुषः।

अशान्तः- शान्तिहीनः।

निस्पृहः- निरासक्तः।

ग) योगक्षेमं वहाम्यहम् - भारतीय जीवन बीमा निगमः।

कर्मणि व्यजते प्रज्ञा - केरल सर्वकलाशाला ।

नभस्पृशं दीप्तम् - भारतीयवायुसेना।

अहर्निशं सेवामहै - बि एस् एन् एल् ।

**Que.4. खण्डिकां पठित्वा प्रश्नानामुत्तराणि लिखत। [Marks :(4)]**

**यस्य मनः प्रसन्नं भवति तस्य दुःखानि न भवन्ति। तस्य बुद्धिः एकाग्रतां याति। इन्द्रियसंयमनहीनस्य ज्ञानं नास्ति। तस्य भावनापि न भवति। ध्यानाभ्यासरहितस्य शान्तिः न भवति। शान्तिहीनः सुखं कदापि न अनुभवति। इन्द्रियानुसारि मनः यस्य तस्य विवेकः जले वायुना नीयमाना नौका इव विषयाभिमुखं सञ्चरति।**

**क] कस्य दुःखानि न भवन्ति?**

**ख] कः कदापि सुखं न प्राप्नोति?**

**ग] कस्य ज्ञानं नास्ति?**

**घ] खण्डिकातः अशान्तः इत्यर्थकं पदं चित्वा लिखत।**

**Ans.** खण्डिकां पठित्वा प्रश्नानामुत्तराणि लिखत।

क) यस्य मनः प्रसन्नं भवति तस्य दुःखानि न भवन्ति।

ख) शान्तिहीनः सुखं कदापि न अनुभवति।

ग) इन्द्रियसंयमनहीनस्य ज्ञानं नास्ति।

घ) शान्तिहीनः।

**Que.5. किं गणे नान्तर्भवति?** **[Marks :(4)]**

**क) (बुद्धिः, प्रज्ञा, आशा, मतिः )**

**ख) (अम्भः, आकाशः ,जलं, तोयम् )**

**ग) (विजयाय, विहाय, विहृत्य, निधाय )**

**घ) (आशु, शीघ्रं, मन्दम्, झटिति)**

**Ans.** किं गणे नान्तर्भवति?

क) आशा।

ख) आकाशः।

ग) विजयाय।

घ) मन्दम्।

**Que.6. कोष्ठकात् समुचितमुत्तरं चित्वा लिखत।** **[Marks :(3)]**

**क) भगवद्गीता कस्मिन् ग्रन्थे अन्तर्भवति ?**

**(रामायणे, महाभारते, रघुवंशे, कुमारसम्भवे )**

**ख) पार्थसारथिः कः?**

**(कृष्णः, अर्जुनः, भीमः, युधिष्ठिरः)**

**ग) भगवद्गीतायां कति श्लोकाः सन्ति?**

**(600, 700, 800, 900)**

**Ans.** कोष्ठकात् समुचितमुत्तरं चित्वा लिखत।

क) महाभारते।

ख) कृष्णः।

ग) 700

**Que.7. श्लोकं पठित्वा उचितः आशयः कः इति चित्वा लिखत।** **[Marks :(1)]**

**विहाय कामान्यः सर्वान्**

**पुमांश्चरति निस्पृहः।**

**निर्ममो निरहङ्कारः**

**स शान्तिमधिगच्छति।।**

**क) इन्द्रियानुसारि मनः यस्य अस्ति तस्य विवेकः जले वायुना अलक्ष्यं नीयमाना नौका इव विषयाभिमुखं सञ्चरति।**

**ख) यः पुरुषः सर्वान् कामान् विहाय निरासक्तः अहङ्कारममतारहितः चरति सः सर्वदा शान्तिं प्राप्नोति।**

**Ans.** श्लोकं पठित्वा उचितः आशयः कः इति चित्वा लिखत।

ख) यः पुरुषः सर्वान् कामान् विहाय निरासक्तः अहङ्कारममतारहितः चरति सः सर्वदा शान्तिं प्राप्नोति।

**Que.8. "अशान्तः शान्तिं न प्राप्नोति" इति आशययुक्तं श्लोकं चित्वा लिखत।** **[Marks :(2)]**

| | |
|---|---|
| **क) प्रसादे सर्वदुःखानां** | **ख) नास्ति बुद्धिरयुक्तस्य** |
| **हानिरस्योपजायते।** | **न चायुक्तस्य भावना।** |
| **प्रसन्नचेतसो ह्याशु** | **न चाभावयतः शान्ति-** |
| **बुद्धिः पर्यवतिष्ठते।।** | **रशान्तस्य कुतः सुखम्।।** |

**Ans.** अशान्तः शान्तिं न प्राप्नोति इति आशययुक्तं श्लोकं चित्वा लिखत।

ख) नास्ति बुद्धिरयुक्तस्य

न चायुक्तस्य भावना।

न चाभावयतः शान्ति-

रशान्तस्य कुतः सुखम्।।

**Que.9. सूचनाः उपयुज्य गद्यक्रमं लिखत।** **[Marks :(4)]**

**इन्द्रियाणां हि चरतां**

**यन्मनोऽनुविधीयते।**

**तदस्य हरति प्रज्ञां**

**वायुर्नावमिवाम्भसि।।**

**सूचनाः- इन्द्रियानुसारी------- यस्य अस्ति तस्य -------- जले ----------अलक्ष्यं -------- नीयमाना ----- इव विषयाभिमुखं सञ्चरति।**

**Ans.** सूचनाः उपयुज्य गद्यक्रमं लिखत।

सूचनानाम् परिपूर्णता .

भाषाशैली: ।

वाक्यघटना।

**Que.10. श्लोकं पठित्वा प्रश्नानामुत्तराणि लिखत-** **[Marks :(3)]**

**१) नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना।**

**न चाभावयतः शान्तिरशान्तस्य कुतः सुखम्।।**

**क. कस्य भावना नास्ति?**

**ख. अधोरेखाङ्कितशब्दस्य पदच्छेदं लिखत।**

**ग. अस्मिन् श्लोके क्रियापदं किम्?**

**घ. अयं श्लोकः कस्मात् ग्रन्थात् स्वीकृतः?**

**(रामायणात् , भगवत्गीतायाः , मेघदूतात्, रघुवंशात् )**

**२) विहाय कामान्यः सर्वान्**

**पुमांश्चरति निस्पृहः।**

**निर्ममो निरहङ्कारः**

**स शान्तिमधिगच्छति।।**

**क. अधोरेखाङ्कितपदं विश्लेषयत।**

**ख. अहङ्काररहितः इत्यर्थकं पदं चित्वा लिखत।**

**ग. श्लोकात् ल्यबन्तमव्ययं चित्वा लिखत।**

**घ. श्लोकात् एकं क्रियापदं चित्वा लिखत।**

**३) प्रसादे सर्वदुखानां**

**हानिरस्योपजायते।**

**प्रसन्नचेतसो ह्याशु**

**बुद्धिः पर्यवतिष्ठते।।**

**क. श्लोके नाशः इति अर्थकं पदं किम्?**

**ख. अधोरेखाङ्कितं पदं विश्लेषयत?**

**ग. कस्य बुद्धिः आशु पर्यवतिष्ठते?**

**घ. श्लोकात् एकं क्रियापदं चित्वा लिखत?**

**Ans.** श्लोकं पठित्वा प्रश्नानामुत्तराणि लिखत।

१) क. अयुक्तस्य भावना नास्ति।

ख. बुद्धिः + अयुक्तस्य।

ग. अस्ति।

घ. भगवद्गीतायाः।

२) क. पुमान् + चरति।

ख. निरहङ्कारः।

ग. विहाय।

घ. चरति /अधिगच्छति।

३) क. हानिः।

ख. हि आशु।

ग. प्रसन्नचेतसः बुद्धिः आशु पर्यवतिष्ठते।

घ. जायते /अवतिष्ठते।

**Que.11. उदाहरणं दृष्ट्वा पदच्छेदं लिखत। [Marks :(2)]**

**क. हानिरस्य - हानिः + अस्य।**

**कृतिरस्य ------- + --------।**

**वृत्तिरस्य - ------- + --------।**

**ख. ह्याशु - हि+ आशु।**

**ह्यर्थः - -----+----------।**

**ह्यद्य - ------+---------।**

**ग. वायुर्नावम् - वायुः + नावम्।**

**गुरुर्माम् - --------+-------।**

**गुरोर्मातरम् - --------+-------।**

**घ. पुमांश्चरति - पुमान्+ चरति।**

**श्रीमंश्चरति - -------+ -----।**

**श्रीमंस्तुभ्यम् - -------+ -----**

**Ans.** उदाहरणं दृष्ट्वा पदच्छेदं लिखत।

क. कृतिः + अस्य ।

वृत्तिः + अस्य ।

ख. हि + अर्थः ।

हि + अद्य।

ग. गुरुः + माम् ।

गुरोः+ मातरम् ।

घ. श्रीमन् + चिनोति।

श्रीमन् + तुभ्यम् ।